PONDICHERRY UNIVERSITY

SCHOOL OF HUMANITIES

DEPARTMENT OF SANSKRIT

# MIL Sanskrit Syllabus from 2023-2024 onwards

**SEMESTER-I MIL SANSKRIT 101**

Paper-1. Grammar. Composition and Translation

**Unit-I** 20marks

Alphabets, Consonants, Nouns Declensions; Nominative, Accusative (Singular, dual and plural)

**Unit-II** 20marks

Instrumental case, Dative, Ablative, and Indeclinables, verbal conjugation: first person, second person, third person: Present Tense

**Unit-III** 20 marks

Genitive, locative and Vocative Absolute, Masculine Gender, Feminine Gender and Neuter Gender

**Unit-IV** 20 marks

Verbal Conjugation: Past Tense and Future Tense
Declensions ending in ram>, kiv>. -anu>. mat&, mala,

**Unit – V** 20marks

Translation of simple sentences, Stories & selected Subhashitas

**Books Recommended**:

1. Sanskrit for Beginners by Dr. M. Narasimhachary and Dr.S. Ramaratnam, N&R Publications, Chennai.

---

**SEMESTER:II MIL SANSKRIT 102**

**PAPER-II. PROSE AND POETRY**

Chandrapeeda Charitam, pp. 1-10
Raghuvamsa-canto I, Slokas -40
**Books Recommended**:

**Unit -I** 20 marks

Introduction to Mahakavya and Kalidasa.
introduction to Sanskrit prose Literature & Bana.

**Unit-II** 20 marks

Raghuvamsa, canto I, slokas 1-10
Chandrapeeda charitam Text p. 1-3

CamScanner

**Unit -III** 20 marks

Raghuvamsa, canto I, slokas 11-20

Chandrapeeda charitam Text p. 3-5

**UNIT-IV** 20 marks

Raghuvamsa, canto I, slokas 21-30

Chandrapeeda charitam Text p. 6-8

**UNIT-V** 20marks

Raghuvamsa, canto 1, slokas 31-40
Chandrapeeda charitam Text p. 8-10
Chandrapeeda charitam

Pub: Pandit V.Anantacharya, English Translation by Sri.T.K.Ramachandra Aiyar
RS Vadhyar&sons, Palghat-678003
Raghuvamsa, Ed. T.K. Ramachandra Iyer, R.5 Vadhyar & Sons, Palghat

---

## SEMESTER III MIL SANSKRIT 201

**Paper-III, History of Sanskrit Literature**

History of Sanskrit Literature (Itihasas, Puranas, Mahakavyas, Champus)

~~By T.K.Ramachandra Lyer, Pub.R.S.Vadhyar & Sons, Palghat~~

Unit-1 (Itihasas) 20marks

Unit-II (Purana) 20 marks

Unit-III (Origin & Development of Dramas) 20marks

Unit-IV (Champus) 20 marks

Unit-V (Lyrics) 20 marks

**Books recommended:**
1. A Short History of Sanskrit Literature of Sri T.K.Ramachandra Iyer, R.S. Vadhyar & Sons, Palghat.

CS CamScanner

caps & bold

## SEMESTER IV: MIL 202 SANSKRIT

Paper IV, Drama & Alankaras

Drama: Karna bhara of Bhasa (Full Text)

Unit-1 Origin & Development of Sanskrit Dramas 20 marks

Unit-11 Karna bhara (first half) 20 marks

Unit-III Karna bhara (second half) 20 marks

Unit-IV, Upama, Rupaka, Atisayokti, Kavyalimga, Prativastopama 20 marks

Unit-V Utpreksha, Svabhavokti, Dipaka, & Ullekha, and Slesha 20 marks

**BOOKS:**


1 Karna Bhara of Bhasa, Pub. T.K.Ramachandra Iyer, R.S. Vadhyar & Sons, Palghat.

2. Chandraloka of Jayadeva, Pub. Balamanorama Press, Madras, 1936.


---

# सुभाषितानि

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनात् धर्मं ततस्सुखम्।।

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति कम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ।।

सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत्सुखम्।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।।

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखं मृगाः।।

नभसो भूषणं चन्द्रो नारीणां भूषणं पतिः ।
पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम्।।

माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा।।

CS CamScanner

पुस्तकस्था तु या विद्या परहस्ते च यद्धनम्।
कार्यकाले समायाते न सा विद्या न तद्धनम्।।

सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत् सुखम्।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्॥

क्षणशः कणशश्चैव विद्यामर्थञ्च साधयेत्।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्।।

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च।।

स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।

अन्नदाता भयत्राता विद्यादाता तथैव च।
जनिता चोपनेता च पञ्चैते पितरः स्मृताः ।।

गुरुपत्नी राजपत्नी ज्येष्ठपत्नी तथैव च।
पत्नीमाता स्वमाता च पञ्चैते मातरः स्मृताः।।

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः।

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत् सीतां बन्धनं च महोदधेः ।।

सर्पदुर्जनयोर्मध्ये वरं सर्पः न दुर्जनः।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे ।।

यथा परोपकारेषु नित्यं जागर्ति सज्जनः ।
तथा परापकारेषु नित्यं जागर्ति दुर्जनः ।।

त्यज दुर्जनसंसर्गं भज साधुसामागमम्।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्।।

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिषु ।
परोपकारः पुण्याय पापाय परपीडनम्।।

CamScanner

## 1. द्वौ सखायौ

पूर्वं चोलदेशे द्वौ सखायावास्ताम् । तयोरेकः विद्याप्रियः, अन्यः धनप्रियः, तयोः पितरौ अतीव दरिद्रौ। अतस्तौ पित्रोराज्ञया विदेशं गतौ।

विद्याप्रियः तत्र विद्यालयं प्रविश्य विद्यामधीतवान्। अन्यः कस्यापि श्रेष्ठिनः आपणे व्यापृतः प्रभूतं वित्तमर्जति स्म ।

दशभ्यः वर्षेभ्यः परं तौ स्वदेशं प्रति प्रस्थितौ । वनमार्गेण गच्छतोस्तयोः धनप्रियस्य धनभाण्डं चोराः अपाहरन्। तेन सः निर्धनः जातः।

यदा तौ स्वदेशमागतौ तदा विद्याप्रियं कृतविद्यं वीक्ष्य तद्देशीयः राजा तं मन्त्रिपदे न्ययोजयत्। धनाप्रियस्तु जीविकार्थं गत्यन्तरमपश्यन् तस्यैव मण्त्रिणः सेवकः अभवत्। विद्यायाः माहात्म्यं पश्यत !

**अत एव 'विद्या धनं सर्वधनात् प्रधानम्' इति लोकाः आहुः ।**

Questions

1. कदा कुत्र द्वौ सखायावास्ताम्?

2. तौ कीदृशौ?

3. कुतः तौ विदेशं गतौ?

4. विद्याप्रियः तंत्र कि कृतवान्?

5. अन्यः किमकरोत्?

6. कदा तौ स्वदेशं प्रति प्रस्थितौ?

7. तयोः कस्य किं चोराः अपाहरन्?

8. तेन सः कीदृशः जातः?

9. कः कं मन्त्रिपदे न्ययोजयत्?

10. धनप्रियः किमकरोत्?

CamScanner

## 2.वृद्धस्य कौशलम्

एकदा कश्चित् वृद्धः ग्रामान्तरं गच्छन् पथि श्रान्तः अभवत्। अतः सःविश्रमाय पर्श्वस्थितस्य चूततरोः ममूलमगच्छत्। तस्मिन् वृक्षे पचेलिमानि फलान्यवर्तन्त । वृद्धस्य तेषु स्पृहा जाता। परं सः वृक्षमारुह्य तानि ग्रहीतुं नाशक्नोत्।

दिष्ट्या तस्मिन् तरौ केचित् वानराः फलानि खादन्तः स्थिताः। तानवलोक्य वृद्धः प्रहर्षं गतः। सः किमकरोत्? सः कतिचित् उपलानादाय वानरान् लक्ष्यीकृत्य प्राक्षिपत् । वानराः कुपिताः कानिचित् फलान्यवचित्य वृद्धं प्रति प्राक्षिपत् । वानराः कुपिताः कानिचित् फलान्यवचित्य वृद्धं प्रति प्राक्षिपन्। वृद्धः सहर्षं तान्यादाय स्वाभीष्टदेशं गतः ।

अहो ! वृद्धस्य कौशलम् ।

Questions

1. कः पथि श्रान्तः अभवत्?
2. सः किमकरोत्?
3. कुत्र कीदृशानि फलान्यवर्तन्त?
4. वृद्धस्य का जाता?
5. सः किं कर्तुं नाशक्नोत्?
6. कुत्र के फलानि खादन्तः स्थिताः?
7. कथं वृद्धः प्रहर्षं गतः?
8. सः किमकरोत्?
9. वानराः किमकुर्वन्?
10. वृद्धः तान्यादाय कुत्र गतः?

CS CamScanner

## 3.सुबुद्धिः दुर्बुद्धिश्च-

कस्मिन्श्चित् अग्रहारे द्वौ सखायावास्ताम्। तयोरेकः सुवुद्धिः, अन्यः दुर्बुद्धिश्चासीत्। तौ कदाचित् सायं उद्यानमगच्छताम्। तत्र बालवृक्षेषु रुचिराणि फलान्यासन्। तानि दृष्ट्वा दुर्बुद्धिरवदत् – मित्र ! कतिपयानि फलानि गृहीत्वा गृहं नयावः इति।

तदा सबुद्धिरकथयत् – 'सखे! मैवं कुरु। उद्यानपालः आवां दण्डयेत्' इति। तस्य वचनमनादृत्य दुर्बुद्धिः पञ्चषाणि फलान्यवचित्य सुबुद्धेः हस्ते अर्पितवान्।

अत्रान्तरे तस्य उद्यानस्य पालकः तानमर्त्सयत। भीतः दुर्बुद्धिरवदत् – 'आर्य! एतानि फलानि मया न पातितानि। किन्तु अनेन मम सख्या पातितानि। अहं नापराधी' इति। तच्छ्रुत्वा उद्यानपाल सुबुद्धिमताडयत्।

**तस्मात् – 'दुर्जनैः सह मैत्री न कर्तव्या'।**

Questions

1. द्वौ सखायौ कुत्र आस्ताम्?

2. तौ कदाचित् कदा कुत्र अगच्छताम्?

3. कुत्र केषु रुचिराणि फलान्यासन्?

4. तानि दृष्ट्वा दुर्बुद्धिः किमवदत्?

5. तदा सुबुद्धिः किमकथयत्?

6. तस्य वचनमनादृत्य दुर्बुद्धिः किमकरोत्?

7. तच्छ्रुत्वा उद्यानपालः किमकरोत्?

8. कैः सह मैत्री न कर्तव्या?

CS CamScanner

## 4.चैत्रः मैत्रश्च

आचार्यरामतीर्थस्य चैत्रः मैत्रश्चेति द्वौ शिष्यावास्ताम्। तौ गुरोः गृहस्य समीपे द्वयोः कोष्ठयोः न्यवसताम्।

एकदा गुरुः तयोः बुद्धिचातुर्यपरीक्षार्थं ताभ्यामेकैकं रूप्यकं दत्वा अकथयत् – 'इदमत्यल्पं धनम्। तथापि येन युवयोः कोष्ठौ पूर्येयातां तादृशं किमपि वस्तु क्रीत्वा आनयताम्' इति ।

चैत्रः सद्यः एव कस्यापि कृषीवलस्य गृहं गत्वा तेन धनेन पलालं क्रीतवान्। ततः सः स्वयमेव तदानीय तेन कोष्ठे पूरयित्वा गुरवे न्यवेदयत् – 'आर्य ! अयं कोष्ठः पूरितः' इति । गुरुः सविषादं 'त्वया साधु न कृतम्' इत्यवदत् ।

मैत्रः विपणिं गत्वा एकं दीपमानयत् । सः तं प्रज्वाल्य कोष्ठे निधाय गुरवे न्यवेदयत् – 'आर्य ! अयं कोष्ठः पूरितः' इति । गुरुः सहर्षं शिरः कम्पयन् 'साधु कृतम्' इत्यभ्यनन्दत्। ततः प्रभृति उपाध्यायस्य मैत्रे प्रीतिरवर्धत। पश्यत! मैत्रस्य बुद्धिचातुर्यम्।

Question:

1. चैत्रः मैत्रश्च कस्य शिष्यौ?

2. तौ कुत्र न्यवसताम्?

3. गुरुः तयोः परीक्षार्थं किमकरोत्?

4. चैत्रः कुत्र गत्वा किं क्रीतवान्?

5. सः किं कृत्वा गुरवे किं न्यवेदयत्?

6. चैत्रस्य प्रवृत्तिं दृष्ट्वा गुरोः किमभवत्?

7. मैत्रः कुत्र गत्वा किमानयत्?

8. सः किं कृत्वा गुरवे किं न्यवेदयत्?

9. गुरुः सहर्षं शिरः कम्पयन् किमवदत्?

10. ततः प्रभृति गुरोः कस्मिन् प्रीतिरवर्धत?

CS CamScanner